# Viprakritam 1 Vishnu Stotram

# વિપ્રકૃતં ૧ વિષ્ણુસ્તોત્રમ્

## Document Information

Text title : Viprakritam 1 Vishnu Stotram

File name : viprakRRitaM1viShNustotram.itx

Category : vishhnu, vishnu, skandapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : skandapurANa | AvantyakhaNDa | revAkhaNDa | adhyAya 20/25-33||

Latest update : June 24, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 24, 2025

*sanskritdocuments.org*

# વિપ્રકૃતં ૧ વિષ્ણુસ્તોત્રમ્

તં દૃષ્ટ્વા ભક્તિમાન્દેવં સ્તોતુકામો વ્યવસ્થિતઃ ।
જયેશ જય વાગીશ જય દિવ્યાઙ્ગભૂષણ ॥ ૨૫॥

જય દેવપતે શ્રીમન્સાક્ષાદ્બ્રહ્મ સનાતન ।
તવ લોકાઃ શરીરસ્થાસ્ત્વં ગતિઃ પરમેશ્વર ॥ ૨૬॥

ત્વદાધારા હિ દેવેશ સર્વે લોકા વ્યવસ્થિતાઃ ।
ત્વં શ્રેષ્ઠઃ સર્વસત્ત્વાનાં ત્વં કર્તા ધરણીધરઃ ॥ ૨૭॥

ત્વં હૌત્રમગ્નિહોત્રાણાં સૂત્રમન્ત્રસ્ત્વમેવ ચ ।
ગોકર્ણં ભદ્રકર્ણં ચ ત્વં ચ માહેશ્વરં પદમ્ ॥ ૨૮॥

ત્વં કીર્તિઃ સર્વકીર્તીનાં દૈન્યપાપપ્રણાશિની ।
ત્વં નૈમિષં કુરુક્ષેત્રં ત્વં ચ વિષ્ણુપદં પરમ્ ॥ ૨૯॥

ત્વયા તુ લીલયા દેવ પદાક્રાન્તા ચ મેદિની ।
ત્વયા બદ્ધો બલિર્દેવ ત્વયેન્દ્રસ્ય પદં કૃતમ્ ॥ ૩૦॥

ત્વં કલિર્દ્વાપરં દેવ ત્રેતા કૃતયુગં તથા ।
પ્રલમ્બદમનશ્ચ ત્વં સ્રષ્ટા ત્વં ચ વિનાશકૃત્ ॥ ૩૧॥

ત્વયા વૈ ધાર્યતે લોકાસ્ત્વં કાલઃ સર્વસઙ્ક્ષયઃ ।
ત્વયા હિ દેવ સૃષ્ટાસ્તાઃ સર્વા વૈ દેવયોનયઃ ॥ ૩૨॥

ત્વં પન્થાઃ સર્વલોકાનાં ત્વં ચ મોક્ષઃ પરા ગતિઃ ।
બ્રહ્મા ત્વદુદ્ભવો દેવો રજોરૂપઃ સનાતનઃ ।
રુદ્રઃ ક્રોધોદ્ભવોઽપ્યેવં ત્વં ચ સત્ત્વે વ્યવસ્થિતઃ ॥ ૩૩॥

એતચ્ચરાચરં દેવ ક્રીડનાર્થં ત્વયા કૃતમ્ ।

ઇતિ શ્રીસ્કન્દપુરાણે આવન્ત્યખણ્ડે રેવાખણ્ડે વિંશાધ્યાયાન્તર્ગતં
વિપ્રકૃતં વિષ્ણુસ્તોત્રં સમાપ્તમ્ ।

સ્કન્દપુરાણ । આવન્ત્યખણ્ડ । રેવાખણ્ડ । અધ્યાય ૨૦/૨૫-૩૩ ॥

skandapurANa . AvantyakhaNDa . revAkhaNDa . adhyAya 20/25-33..

Proofread by PSA Easwaran

---

*Viprakritam 1 Vishnu Stotram*

pdf was typeset on June 24, 2025

Please send corrections to *sanskrit@cheerful.com*